Volume : 3 | Issue : 11 | November 2014 • ISSN No 2277 - 8179

।।श्रीनिधिस्वामिनां सूक्तिषु दशावतारपराः श्लोकाः।।
Shri Nidhiswamina Suktisu dashavtaaranubhavpara shlokaa

Sanskrit

KEYWORDS : दशावताराः , आशुकविसार्वभौमाः, श्रीनिधिस्वामिनिः , सहिाचलः

Shri V.S.Karunakaran

B.E.(Mech), M.E.(Sanskrit), (PhD), "Srinidhi Karuna" # 6, Bharathiyar Street, Sivakami Nagar, Gowrivakkam, Chennai 600 073.

ABSTRACT

भगवतो विष्णोरवताराः प्रसिद्धाः।तेषां वर्णनं वेदसाहित्योपज्ञम्।इतिहास-पुराण-काव्य-स्तोत्र-साहित्येषु च प्रथिता इमे अवतारा विशिष्य दशेति गणिताः।तद्विषये गतशताब्दे भारतभुवं अलङ्कृतवतां आशुकविसार्वभौम इति बिरुदभाजां श्रीनिधिस्वामिनां साहित्येष्वपि विलक्षणोऽनुभवविशेषो वर्तते। विशिष्य सिंहाचलपञ्चाशति यत्र सिंहाचलस्य दशावतारतया श्लेषतो वर्णनं रमणीयम्।।

1.पूर्वपीठिका
श्रियः पत्या भगवता नारायणेन लोकरक्षणार्थं बहवोऽवताराः कृताः। तेषां संख्येयमिति न निर्देष्टुं शक्यते। तानधिकृत्य श्रुतयोऽपि वदन्तीति वैदिकानां आशयः।

2.अवतारविषये श्रौतानि प्रमाणानि
एवमवतारपरिग्रहेण बहुवारं स भगवान् जायते इति तैत्तिरीयारण्यके

अजायमानो बहुधा विजायते[1]
इत्यत्र घुष्टम्।अयं वाक्यविशेषः
प्रजापतिश्चरति गर्भे अन्तः ।
अजायमानो बहुधा विजायते ।
तस्य धीराः परिजानन्ति योनिम्।
मरीचीनां पदमिच्छन्ति वेधसः।[2]

इति पादशः पठ्यमानायाः त्रिष्टुप्छन्दसि भ्राजमानायाः ऋचो द्वितीयः पादः।
यद्यपि तत्र श्रीभट्टभास्करैः "आत्मसमष्टिः प्रजानां पतिः जीवात्मा अन्तर्गर्भे चरति सर्वेषु शरीरेषु आब्रह्ममशकं स्वयं अजायमान एव बहुप्रकारशरीरसंबन्धेन विविधं जायमान इव भवति।तस्यैतस्य जायमानस्य जीवस्य योनिं कारणं शरीरसंबन्धकारणं वा धीराः धीमन्तः परिजानन्ति-सर्वात्मना जानन्ति।कीदृशाः? ये वेधसः विधातारः प्रकृष्टज्ञानाः मरीचीनां पदं-रश्मीनां पदं स्थानं आदित्यात्मानं इच्छन्ति याथात्म्येन विजानन्ति प्रविशन्ति वा। ते तं योनिं जानन्ति। नान्यत् (नान्यैः) ज्ञातुं शक्यते।" सूर्य आत्मा" इति च श्रुतिः" [3]।इति प्रजापतिशब्दो जीवात्मपरतयाऽभाषि । तथापि श्रीसायणाचार्यैः"ब्रह्माण्डरूपे गर्भे अन्तर्मध्ये प्रजापतिर्विग्रहवान् भूत्वा चरति।स च वास्तवेन रूपेण सत्यं ज्ञानं अनन्तं ब्रह्म इत्यादिश्रुत्या प्रतिपादनात् अजायमान एव तथाऽपि मायिकेन रूपेण बहुधा स्थावरजङ्गमादि बहुप्रकारो विशेषेण जायते।तस्य प्रजापतेः योनिं जगत्कारणरूपं वास्तवं स्वरूपं धीरा धैर्यवन्तो योगेन निरुद्धेन्द्रिया महात्मानो जानन्ति।वेधसो विधातारः सृष्टिकर्तारस्तमेवोपास्य मरीचीनां मरीच्यत्रिप्रमुखानां महर्षीणां पदं जगदुत्पादकत्वलक्षणमिच्छन्ति[4]। इति प्रजापतिशब्दोऽत्र परात्मपरतयैव व्याख्यायि।

विशिष्टाद्वैतिनां संप्रदाये आदृतया द्राविडिपाठरीत्या तैत्तिरीयोपनिषदः द्वितीये प्रपाठके प्रथमेऽनुवाके इमं विषयमेव आदरातिशयेन पुनः पपिठिषन्तीयं श्रुतिः इत्युन्नयोऽपि शोभते। यतः तत्र श्रुतिः

अद्भ्य्यस्संभूतो हिरण्यगर्भ इत्यष्टौ [5]
इति प्रतीकं प्रदर्शयति।

संप्रदयान्तरेषु आदृते आन्ध्रपाठे तैत्तिरीयारण्यकस्य दशमप्रपाठकतया पठ्यमाने तत्र तत्र पाठभेदैः जुष्टेऽपि अस्मिन् एव भागे, प्रथमेऽनुवाके अयं प्रतीकः अविगीतस्समुल्लसत्येव।

अद्भ्यस्संभूत इत्ययमनुवाकस्समग्रोऽपि तथा
हिरण्यगर्भस्समवर्तताग्रे। [6]
इति प्रारभ्य संहितायां चतुर्थे काण्डे प्रथमे प्रपाठके अष्टमेऽनुवाके पठितानां अष्टानामपि ऋचां पाठः कार्य इति हि अनेन प्रतीकेन प्रतिपाद्यते।

अजायमानो बहुधा विजायते। [7]

इत्ययं वाक्यविशेषः अद्भ्यस्संभूत इत्यनुवाके खलु वर्तते।

ततश्च तस्य उपनिषदन्तर्गतत्वात् उपनिषद्भाष्यरचनायां प्रवृत्तानां विशिष्टाद्वैत-दार्शनिकानामपि अयं वाक्यविशेषो व्याख्येयोऽजनि।यद्यपि अत्र श्रीविशिष्टाद्वैतरीत्या उपनिषदां भाष्यं विरचितवद्भिः श्रीरङ्गरामानुजमुनिभिः व्याख्यानं विशिष्य न कृतं तथाऽपि श्रीकूरनारायणमुनिभिरस्य व्याख्या कृता लभ्यते। तत्र च

विषयस्यातिभूमित्वात् ज्ञानदौष्कर्यशङ्किनाम्।
अवतारेण सौलभ्यं त्रिष्टुभोक्तं तृतीयया।।[8]

इति कारिकया कृतावतारिका अस्या ऋचो व्याख्या।सा च व्याख्या इत्थं-प्रजापतिः-असद्व्यावृत्तानां सर्वेषां पतिस्स्वामी रक्षिता।पातेर्डतिप्रत्ययः।गर्भे-स्वसृष्टे ब्रह्माण्डे।अन्तः-मध्ये।चरति-विग्रहवान् भूत्वा।स्वचरणकमलसमाश्रयणसौकर्याय देवमनुष्यादिसजातीयतया स्वयमवतीर्य चेतनैस्सह चरति।तथाऽह स्वयमेव-

यदा यदा हि धर्मस्य
ग्लानिर्भवति भारत!
अभ्युत्थानमधर्मस्य
तदात्मानं सृजाम्यहम्।।
परित्राणाय साधूनां
विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय
संभवामि युगे युगे।।[9]

इति।तर्हि अविकारश्रुतिविरोध इत्यत्राह अजायमान इति।अजायमानः स्वयमकर्मवश्यतया सततनिर्विकारोऽपि।आश्रितार्थं बहुधा –सुरनरतिरश्चामपि रूपेण स्वेच्छया विजायते- विविधं जायते

इच्छागृहीताभिमितोरुदेह:[10]

इति। तस्य प्रजापतेः योनिं-तथा अवतारहेतुतत्त्वं अवताररहस्यतत्त्वं धीराः-प्राचेतस-पराशर-पाराशर्य-शुक-शौनक-पराङ्कुश-नाथ-यामुन-रामानुजाचार्यादयः। परिजानन्ति-सर्वप्रकारमवगच्छन्ति। किंविशिष्टाः?-वेधसः-विधातारः लीलाधीन-सकल-बन्धन-विमोक्षणादिव्यापाराः। मरीचीनां-असङ्कुचित-नित्य- ज्ञान-तेजो-निधीनां अनन्त-वैनतेय-विष्विक्सेनादीनां सूरीणां पदं इच्छन्ति-प्राप्नुवन्ति। अनेकार्थत्वात् धातूनाम्। त एव ज्ञाने प्रभवन्ति, नान्ये इति भावः। तथा श्रुतिः-

ते ह नाकं महिमानस्सचन्ते।
यत्र पूर्वे साध्यास्सन्ति देवाः।।[11]

तथा च यामुनाचार्याः "त्वदाश्रितानां" [12] इत्यादि।
तैत्तिरीयब्राह्मणे तृतीयाष्टके षष्ठे प्रपाठके प्रथमेऽनुवाके यूपाञ्जनीयमन्त्रा[13] इति प्रसिद्धास्सप्त ऋग्विशेषाः पठिताः।तत्र षष्ठी ऋक् यागेषु यूपस्तंबे रसनया परिवीयमाणे

"यूपाय परिवीयमाणायानुब्रूहि!" [14]
इति प्रेषितेन होत्रा पठनीया। सा च इत्थं-
युवा सुवासाः परिवीत आगात्।
स उ श्रेयान् भवति जायमानः।
तं धीरासः कवय उन्नयन्ति।

Volume : 3 | Issue : 11 | November 2014 • ISSN No 2277 - 8179

स्वाधियो मनसा देवयन्तः।।[15]

अस्याश्च व्याख्यानं श्रीभट्टभास्करीयमित्थं - “यूपाय परिवीयमाणायानुब्रूहि!” [14]
इत्युक्तेऽन्वाह- युवा सुवासा इति त्रिष्टुप्।यथा कश्चित् युवा सुवासाः- शोभनवासाः एति अग्रतः आगच्छति एवमयं परिवीतः रशनया वेष्टितः आगात्-आगतस्संपन्न इति यावत्।स एव हि जायमानो दिन दिन निष्पाद्यमानः श्रेयान्-प्रशस्यतरः भवति। तं खलु धीरासः-धीमन्तः कवयः- क्रान्तदर्शिनः उन्नयन्ति- ऊर्ध्वं नयन्ति गुणैरुच्छ्रितिं स्तुत्यं कुर्वन्ति स्वाधियः –स्वधियः स्वयमेव ध्यायन्ति इति स्वधियः छान्दसं दीर्घत्वम्।मनसा देवयन्तः- देवान् प्राप्तुमिच्छन्तो यजमाना इति यावत्। तस्मात् वयमपि तथा कुर्म इति[16]।

श्रीसायणाचार्यैरपि इयमृक् “यथा लोके सुवासाः शोभनवासोपेतो युवा यौवनयुक्तः पुरुषोऽग्रत आगच्छति एवमयं यूपः परिवीतो रसनया वेष्टितःआगादिह कर्मण्यागतः।स उ स एव यूपो जायमानः इह कर्मणि निष्पद्यमानः श्रेयान् दिन दिन प्रशस्यतरो भवति।तं यूपं धीरासो बुद्धिमन्तः कवयः विद्वांसो यजमानादयः उन्नयन्ति स्तूयमानैर्गुणैःउच्छ्रितिं कुर्वन्ति।कीदृशा यजमानादयः।स्वाधियः- स्वयमेव बुद्ध्या यन्ति स्वतन्त्रबुद्धय इत्यर्थः।मनसा स्वकीयेन देवयन्तो देवान् प्राप्तुमिच्छन्तः” [17]इति व्याख्याता।

यूपार्थकमिममेव मन्त्रं विनियोगपृथक्त्वन्यायमवलम्ब्य श्रीविशिष्टाद्वैतदर्शनाचार्याः पुरुषोत्तमपरत्वेन व्याख्यातवन्तः।तत्र ऋचोऽस्याः द्वितीयं पादं विशिष्य भगवतोऽवतारप्रशंसापरं व्याख्यन्ति।

तिरुप्पावै दिव्यप्रबन्धविवृते प्रतिवादिभयङ्करं काञ्ची श्रीमदण्णङ्गराचार्यस्वामिनः एकविंश्यां गाथायां विद्यमानस्य “जगति प्रादुर्भूत तेजःपुञ्जमय!” [18] इति संबोधनस्य पूर्वेषां सृतिमनुसृत्य एवं लिखन्ति –स्वकीयप्रभावातिशयानां शास्त्रैकप्रतिपत्तव्यतां असहमानस्तदा तदा साक्षादप्यवतीर्य तान् अतिमात्नरं प्रकाश्य स्वयं निरतिशयौज्ज्वल्यशाली भवति भगवानिति प्रतिपादयन्ति

स उ श्रेयान् भवति जायमानः।[19]
इति श्रुतिमनुसृत्यावतीर्णमिदं संबोधनम्।उपात्तश्रुतिवाक्ये द्वितीयं पदं अवधारणार्थकम्।तच्च पदं इतरेषु चतुर्ष्वपि पदेषु अन्वेतुं प्रभवतीति विलक्षणोऽयं पन्थाः।तत् कथमिति चेदवधेयम्।उः एवकारार्थकः इति न विस्मर्तव्यम्। स एव जायमानश्श्रेयान् भवति; स जायमानस्सन् श्रेयानेव भवति; स जायमान एव श्रेयान् भवति; स जायमानश्श्रेयान् भवत्येव –इति सर्वथाप्यन्वयः सुशोभन”[20] इति।

एवमवतरणैरेव श्रेयान् भवन् भगवान् बहुधा अवतरति।तदुक्तं तेनैव गीतासु

बहूनि मे व्यतीतानि
जन्मानि तवचार्जुन!।[21]
इति।

3.अवताराणामानन्त्येपि दशेति गणना तत्र प्राचां आसक्तिश्च
तदेवं श्रुतिनिरूपिता भगवतोऽवताराः संख्यातीताः।तथापि तत्र व्यूहावतारा विभवावताराः अर्चावतारा इति भिदाः श्रुतीतिहासपुराणपाञ्चरात्रागमादिभ्यो अवगम्यन्ते।तत्र स्वकीयविभवभूतानां मध्ये तेष्वयमप्येक इति प्रतीयमानतया आविर्भावो विभववातार उच्यते।उक्तञ्च यतीन्द्रमतदीपिकायां प्रथमे अवतार एव “मत्स्यादयो भवाः पुनरनन्ता” इति। ईश्वर निरूपणे च एवं “विभवो नाम तत्तत्सजातीयरूपेणाविर्भावः।ते च प्रसिद्धिप्राधान्येन दशधा ।ते च मत्स्यकूर्मादयोऽवतारविशेषाः” [22]इति।

एतेषां समेषां कीर्तनं श्रुतिषु नोपलभामहे।परं तु “ इदं विष्णुर्विचक्रमे..” [23]इति त्रिविक्रमावतारप्रस्तावः, “उद्धृतासि वराहे” [24]णेति वराहवतारः इत्यादि केषाञ्चिदवताराणां कथनसन्दर्भो विराजत एव।

इतिहासयोः श्रीरामावतारवैभववर्णपरे श्रीमति रामायणे तु एकशृङ्गस्य वराहस्य त्रिविक्रमावतारस्य परशुपरक्रिमणो वृत्तान्तः च स्पृश्यत एव।[25]

महाभारते तावत्तथा तच्छेषभूते हरिवंशग्रन्थे च दशावतारवृत्तान्ताः तत्र तत्र पठ्यन्ते एव।

तत्र श्रीवेदव्यासभगवता प्रणीतमिति प्रथितमेकं दशावतारसङ्ग्राहकं पद्यमित्थं

मत्स्यः कूर्मो वराहश्च
नृसिंहो वामनस्तथा।
रामो रामश्च रामश्च
कृष्णः कल्की जनार्दनः।।[26]

पुराणेष्वपि प्रायशो दशावतारवृत्तान्तः तत्र तत्र कथ्यत एव।
संस्कृतवाङ्मये महाकाव्येषु दशावतारप्रसङ्गो बहुधा क्रियते एव।

श्रीमति नैषधमहाकाव्ये तु नायको नलमहाराजः प्रतिदिनं माध्याह्निकस्नानानन्तरं हरपूजां विधाय समनन्तरं पुरुषोत्तमपूजां प्रततान इति विस्तरशः प्रतिपाद्यते एकविंशे सर्गे[27]। तत्प्रकरणे च ५६ तमश्लोकत आरभ्य ९३ तमश्लोकपर्यन्तं क्रमेण ३८ श्लोकैः दशावतारवर्णनं श्रीहर्षेण कृतमस्ति।

क्षेमेन्द्रेण च कवितल्लजेन दशावतारमहाकाव्यं रचितं प्रसिद्धमेव।[28]

स्तोत्रसाहित्येष्वपि भगवतस्तोत्रेषु दशावतारवर्णनप्रक्रिया सुरुचिरं क्रियमाणा वरीवर्तते स्म।श्रीशङ्करभगवत्पादकृततया प्रसिद्धायां विष्णुपादादिकेशस्तुतौ एकेन श्लोकेन दशावतारवर्णमेवमकारि।

मत्स्यः कूर्मो वराहो नरहरिणिपतिः वामनो जामदग्न्यः
काकुत्स्थः कंसघाती मनसिजविजयी यश्च कल्की भविष्यन्।
विष्णोरंशावतारा भुवनहितकरा धर्मसंस्थापनार्थाः
पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशया ये ॥४९॥[29]

श्रीकूरेशमिश्रैर्भगवद्रामानुजप्रियशिष्यैर्विरचितेषु पञ्चस्तवेषु अतिमानुषस्तवः बहूनवतारान् दशावतारेषु वर्णयति [30]।श्रीसुन्दरबाहुस्तवे [31] तु क्रमेण तेषां वर्णनं वर्तते। श्रीवरदराजस्तवे च केषाञ्चिदथ तेषाम्।

श्रीभट्टपराशरपादानां च तत्पुत्राणां कृतौ श्रीरङ्गराजस्तवे उत्तरशतके क्रमेण दशावतारप्रतिपादनं क्रियते [32]।

श्रीवात्स्यवरदगुरुभिः परमार्थपञ्चके एकेन श्लोकेन समेषां दशानां अवताराणां कथनमेवमकारि। स च श्लोक इत्थं-

वेदान्वेषणमन्दराद्रिभरणक्ष्मोद्दारणस्वाश्रित-
प्रह्लादावनभूमिभिक्षणजगद्विक्रान्तयो यत्क्रियाः।
दुष्टक्षत्रनिबर्हणं दशमुखाद्युन्मूलनं कर्षणं
कालिन्द्या अतिकंसपापनिधनं यत्क्रीडितं तं नुमः।।[33]

तेषां च प्रशिष्यैः विश्वविदितविभवैःकवितार्किकसिंहैः श्रीनिगमान्तमहादेशिकैः दशावतारस्तोत्रमिति पृथगेकं स्तोत्रं दशावतारविषयकं व्यरचि।तत्र उपान्तिमे श्लोके समेषां अवताराणां संबोधनात्मकोऽयं श्लोकः

इच्छामीन! विहारकच्छप! महापोत्रिन्! यदृच्छाहरे!
रक्षावामन! रोषराम! करुणाकाकुत्स्थ! हेलाहलिन्!।
क्रीडावल्लव! कल्कवाहन! दशाकल्पिन्निति प्रत्यहं
जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघपण्यापणाः।।[34]

त एव स्वकीये श्रीदयाशतके भगवतो वेङ्कटेशस्य दयामधिकृते स्तोत्रे च मध्ये भगवतो दशस्वपि अवतारेषु तद्दयाया विहारविशेषान् वर्णयन्ति [35]। एवं श्रीवरदराजस्तवेऽपि [35] केषाञ्चिदवताराणां अनुभूतिरस्ति।श्रीसङ्कल्पसूर्योदये [36] दृश्ये तु दशानामप्यवताराणां रमणीयरीत्या प्रतिपादनमाविष्कृतं जृम्भते।

श्रीजयदेवमिश्राणां श्रीगीतगोविन्दे वर्तमानं दशावतारगीतमपि सुप्रसिद्धम्।तत्र च प्रकरणे प्रसिद्धमिदं पद्यम्

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिञ्छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यञ्जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः।।[37]

एवं वैदिकसाहित्ये लौकिकसाहित्ये महाकविभिः महाभक्तैरपि सादरं साभिनिवेशञ्च सातत्येन अनुभूयमानं अवतारदशकं नारायणस्य। नात्र

कमपि विस्मयाय यत् श्रीमदाशुकवि सार्वभौमश्रीनिधिस्वामिनः (१९१३-२००१A.D.) अपि दशावतारानुभूतमिदुरचेतसा समुज्ज्वला अभूवन्निति।

4.श्रीनिधिस्वामिनां श्रीदशावतारानुभवपरीवाहभूताः कृतयः-अवतार गीतम्

तत्र तावदेभिःअवतारगीतमिति प्रबन्धविशेषः १९५८ - तमसंवत्सरे विरचितः। स च श्रीनिधिग्रन्थमालायां मयैव द्वितीयकुसुमे १९७६ तमसंवत्सरे मुद्राप्य प्रकाशितः।पुनरपि अधुना तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन २००३ संवत्सरे कवीश्वराणां शतमानमहोत्सवसमये मुद्रापितः समस्तसूक्तिसङ्कलनात्मके ग्रन्थविशेषे ।

दशश्लोकात्मकोऽयं प्रबन्धस्समग्रोऽपि पङ्क्तिकावृत्तश्लोकैरेव[38] निर्मितः। वृत्तमिदं केचन मौक्तिकं[39] केचन च मरालिकां[39] कथयन्ति। श्राव्यमिदं वृत्तं गानं विना पठनेऽपि गानबुद्धिदम्। अत एव स्थाने कविवरैरवतारगीतमिति दत्तनामाऽयं प्रबन्धः।तत्र स्थालीपुलकतया मत्स्यावतारपरः श्लोक उद्ध्रियते।स च

पाण्ड्यभूपतेः पुण्यमूर्तये
सागरान्तरातन्वते गतिम्।
वेधसे पुरा वेददायिने
मीनरूपिणे ते नमो नमः।।[40]

इति। अत्र द्वितीये पादे सागरान्तः आतन्वते इति पदच्छेदः। न तु सागरान्तरा तन्वते इति।सागरान्तरा इति समासस्य अपाणिनियत्वं वदन्ति वैयाकरणाः।

5.श्रीनिधिस्वामिनां श्रीदशावतारानुभवपरीवाहभूताः कविता

श्रीसिंहाचलपञ्चाशति समुद्रतटे वर्तमानं सिंहाचलमेव दशावतरात्मकं वर्णयन्ति कवीश्वराः।तत्र मत्स्यावतारमूर्तिमिव तं शैलं श्लेषालङ्कारमाश्रित्य एवं कवयन्ति:-

शाखाकुलागमधरो मधुचूषणेन
सर्वाभिनन्द्यविभवश्शुभनिर्झरार्द्रः।
वाराशितीरभुवि भाति पुराणमीनः
स्वामिन्! तवाद्रिरिति तर्कयते मनो मे।।[41]

अत्र शाखानां ऋग्यजुस्सामाथर्वात्मिकानां कुलैः मण्डितस्य आगमस्य धर इति शाखाकुलागमधरो मत्स्यभगवान्। मधुनाम्नोऽसुरस्य चूषणं (संहारश्चूषणमित्युपचर्यते) चकार मत्स्यमूर्तिः। ततश्च सर्वाभिनन्द्यविभवो बभूव। स एव शुभः निर्झरमध्यसञ्चारीति च निर्झरजलार्द्रः शुभनिर्झरजलार्द्रो भवति। वाराशितीरभुवि (स्थितानां जले विहरन्) दृश्यो भवति च।

श्रीसिंहाचलस्तावत् शाखाभिराकुलानामगमानां वृक्षाणां धर इति शाखाकुलागमधरः।तत्रागतैः सर्वैः तद्वृक्षबृन्दलब्धमधुचूषणेन अभिनन्द्यमानविभवः इति मधुचूषणेन सर्वाभिनन्द्यविभवः।स्वभूमौ प्रवहद्भिः शुभैर्निर्झरैरार्द्र इति शुभनिर्झरार्द्रः। वाराशितीरभुवि भाति।।

एवमेव तं शैलं कूर्मं वर्णयति
कूर्मस्तवाचलवरो न हि संशयोऽत्र
सोऽयं यदत्र विबुधामृतलाभहेतुः।
धत्ते भवन्तमचलं किल भोगबद्धं
यल्लालितं किल सुरैरसुरानुषक्तैः।।[42]

कूर्मस्तु विबुधानां देवानां अमृतलाभहेतुः।मन्थाचलमधत्त।स च मन्थाचलस्सर्पराजवासुकिशरीरेण भोगेन बद्धःआसीत्।सुरैरसुरैश्च समं सुधार्थिभिर्लाल्यमानो बभूव।

सिंहाचलपर्वतोऽपि विबुधानां विदुषाममृतस्य मोक्षस्य लाभे हेतुर्भगवन्निवासभूतत्वात् भगवदुपासनप्रपदनयोरुपकुर्वाण इति।भगवन्तं अचलविग्रहं चन्दनभोगबद्धं सुराणामसुराणाञ्च सामान्यमधिदैवतं धत्ते।

अथ तं वराह इति श्लोकयति।
स्वामिन्!तवाद्रिमणिरिष महान् वराहः
उच्चैर्नयन् जनमुपागतमात्मभूमेः।
यद्भूधरस्सुभगभागवतस्तुताङ्गः
सद्यः पयोधिमपहाय समीपतस्सन्।।[43]

श्रीवराहो भगवान् भूमिदेवीं उद्धरन् प्रलयपयोधेरागच्छन् तया पृष्टो बहून् हितान् तस्यै प्रोवाच तेषां सङ्कलनमेव वराहपुराणतां अलभत इतीदमत्रावधेयम्।तदानीं तेन चरमपर्वणि तस्यास्तत्प्रजात्वेनाभिमतानां स्वभक्तानां शोकनिबर्हणं स्वकृत्यमिति ऊर्जयता श्रीवराहेण उक्तौ द्वौ श्लोकौ वराहचरमश्लोकाविति श्रीविशिष्टाद्वैतिनां सिद्धान्ते लाल्येते ।तौ च श्लोकौ

स्थिते मनसि सुस्वस्थे
शरीरे सति यो नरः।
धातुसाम्ये स्थिते स्मर्ता
विश्वरूपञ्च मामजम्।
ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभम्।
अहं स्मरामि मद्भक्तं
नयामि परमाङ्गतिम्।।[44]

इति भवतः।तत्र श्रीवराहोक्तेः निजचरणमुपगतं जनं तदात्मभूमेरुच्चैर्नयन् स वर्तते इति वराहः महानुच्चैर्नयन्नुपगतं जनमात्मभूमेर्विभाति इति अत्र वर्णना।

वराहवतारः भूमेर्धर इति स भूधर एव।

वराहावतारकाले यज्ञमूर्तिं तमवधाय तदङ्गानि यज्ञाङ्गतया निरूप्य मुनयोऽस्तुवन्निति सुभगं श्रीभागवतपुराणं स्वयं वदत् तदङ्गानि स्वयञ्च स्तौतीति वराहस्सुभगभागवतस्तुताङ्गः।अत्र च श्रीमद्भागवते तृतीयस्कन्धे त्रयोदशे अध्याये

जितं जितं तेऽजित यज्ञभावन[45]

इति चतुस्त्रिंशात् श्लोकादारभ्य पञ्चचत्वारिंशश्लोकपर्यन्तं वर्तमानाः श्लोका दृश्याः।तेषां सङ्ग्रहश्च श्रीमद्भागवतसङ्ग्रहभूते श्रीमन्नारायणीये एवमस्ति कृतः-

त्वचि छन्दो रोमस्वपि कुशगणश्चक्षुषि घृतं
चतुर्होतारोऽङ्घ्रौ स्रुगपि वदने चोदर इडा।
ग्रहा जिह्वायान्ते परपुरुष! कर्णे च चमसाः
विभो! सोमो वीर्यं वरद! गलदेशेऽप्युपसदः।।[46]

स च वराहः उद्धृतभूमिस्सद्यःपयोनिधिमपहाय तत्समीपतरो बभूव खलु।।

श्रीसिंहाचलपर्वतोऽपि महान्। उपगतं जनं आत्मभूमेः (सोपानद्वारा) उच्चैर्नयति।स्वयं पर्वतत्वादयं भूधर एव। अस्य च अङ्गानि सुभगानि। भगवद्भक्तैः भागवतैस्तुतानि। ततश्चायं सुभगभागवतस्तुताङ्गः।।सद्यः पयोनिधिमपहाय तत् समीपतस्सन् दृश्यते।।

अथ सिंहाचलो नृसिंहावतार इति प्रथयति।
त्वमेव शैलोऽयमये! नृसिंह!
प्रह्लादसंपोषणदक्षदेहः।
वहन्निजाङ्के वनजातभूतिं
कीर्त्यस्सदा सिंहमुखः प्रसिद्धः।।[47]

भगवान् नृसिंहः प्रह्लादस्य भक्तस्य परिपोषणे दक्षेन सामर्थ्यवता देहेन आकण्ठं नरः गलोपरि सिंह इति आकल्पेन हिरण्यसंहारे तद्वराननतिक्रम्य च कर्म कर्तुं दक्षं दाधार देहमिति प्रह्लाद-संपोषण-दक्ष-देहः।वनजातां- नीरजातां स्वभूतिभूतां स्वैश्वर्यभूतां श्रियमङ्के वहन्नास्ते।सिंहमुखः इति कीर्त्यः प्रसिद्धश्च।

सिंहाचलोऽपि गिरित्वात् द्रष्टुः प्रह्लादे संपोषणे च दक्षं स्वकीयं वपुर्धत्ते इति प्रह्लादसंपोषणदक्षदेहः।स निजाङ्क एव वनजातस्य अरण्यसमूहस्य भूतिमैश्वर्यं वहन्नस्ति। सिंहाचल इति सिंहशब्दं मुखे अग्रे दधता नाम्ना सिंहमुख इति कीर्त्यःप्रसिद्धश्च।

अथ त्रिविक्रमावतारसंवलितवामनावतारस्य सिंहाचलस्य च श्लेषः।
त्रिविक्रमोऽयं तव शैलराजः
विश्वंभरां व्याप्य दिवञ्च भूयः।
आत्माङ्गजातोत्तमवारिधार-
संक्षालितश्रीयुतपाददेशः।।[48]

त्रिविक्रमः खलु पूर्वं वामनस्सन् महाबलिप्रत्तभिक्षो विश्वंभरां भुवं दिवञ्च व्याप्तः जगत्क्रमणार्थं बभूव।आत्माङ्गजातेन

Volume : 3 | Issue : 11 | November 2014 • ISSN No 2277 - 8179

ब्रह्मणा चतुर्मुखेन उत्तमस्य द्रवीभूतस्य धर्मस्य वारिणो धारया संयक्क्षालति-श्रीयुत स्व पाददेशश्च।तदेव वारि गङ्गा।

श्रीसहिाचलोऽपि उन्नतो गरिरिति दविं भुवञ्च व्यापृतः।नजिशरीरजाताभिः उत्तम-वारधिाराभिः क्षालति श्रीयुतपाददेशः उपत्यकाप्रदेशयुक्तः।

अथ शैलः परशुराम इति श्लेषतो वदति
शैलस्त्वायं जमदग्निसूनुः
समस्तलोकस्तुतसत्प्रभावः।
प्रायोऽभिभूताखलिभूधरस्सन्
समुद्रवेलां समया निविष्टः।।[49]

भगवान् परशुपरकिर्मा जमदग्निसूनुः समस्तलोकस्तुतसत्प्रभावः।तेन प्रायशः आखलिा अपि भूधराः क्षत्रयिाः अभभिूता जति इति सः प्रायोऽभिभूताखलिभूधरः।कश्यपाय स्वजतिां नखिलिामपि काश्यपीं दत्त्वा समुद्रवेलां समया केरले निविष्टो वर्तते चरिञ्जीवतिया।

सहिाचलोऽपि श्रीवराहनरसहिवसथभूतः समस्तलोकस्तुतसत्प्रभावः।त स्मादेव हेतोः इतरे सर्वे भूधराः पर्वताः प्रायशस्तेन अभभिूताः। स च प्राचीसमद्रवेलां समया निविष्टः।।

अथ रामत्वं शैलस्य श्लेषतः।
पनसादभिरािवृतं मुदा
कपभिरिनृत्तसमुज्ज्वलैर्भृशम्।
अचलं नरसहि! तावकं
रघुवीरं जयनिं वतिर्कये।।[50]

भगवान् श्रीरामः जयी नावजितिय निवर्तते इति जयशीलः । पनसनामा कपिः आदर्येषां तैः पनसादभिः कपभिः मुदा रावणादपिराजयजातया मुदा भृशं नृत्त-समुज्ज्वलैः स आवृतो भवति।

अयमचलोऽपि पनसवृक्षप्रचुरः।ततश्च पनसफलस्य अदनं कुर्वद्भिः पनसादभिः तत एव मुदा भृशं नृत्तसमुज्ज्वलैः कपभिरिावृतः ।

अथ सीरपरकिर्मणो रामस्य साम्यं श्लेषतः
नीलाम्बरस्पृक् समये हलेन
संभूषतिप्रान्तधराभरिामः।
सर्वंसहावाहनतः प्रसद्धिः
शैलस्त्वायं बलराम एव।।[51]

स च भगवान् नीलमम्बरं वासो वस्त इति नीलाम्बरस्पृक्। स च समयवशिषु हस्तादवमुच्य हलं स्वकीयं आयुधं प्रान्ते निधाय तेन पार्श्वधराप्रदेशेन रमणीयं दर्शनं ददातीति समये हलेन संभूषतिप्रान्तधरः।सङ्कर्षण आदशिषेश्च स एवेति सर्वंसहाया भूम्या वाहनतः प्रसद्धिः।

श्रीसहिाचलोऽपि स्वोन्नतत्यात् नीलमंबरं गगनं स्पृशन् वर्तत इति नीलाम्बरस्पृक्।तं शैलं समया समयवशिषु धरायां कर्षणादकिं कृषीवलकार्यं चलदस्तीति स समये हलेन (इदं जात्येकवचनम्) संभूषतिया प्रान्तया धरया रमणीयतया वर्तते इति समये हलेन संभूषतिप्रान्तधराभरिामः। गरियो भूधरा इति सः सर्वंसहाया भुवः वाहनतः प्रसद्धिः।।

अथ कृष्णावतारसाम्यं श्लेषालङ्कृतमिवलम्ब्य प्रथयति।
संवर्धतिार्जुनवभिूतरियिं गरिस्तिे
नीलाम्बरेण घटति भुवि विश्रुतस्सन्।
संलीनमेघवभिवो नजिशोभनाङ्गे
कृष्णायते वमृिशतां वबिुधोत्तमानाम्।।[52]

स हि भगवान् श्रीकृष्णः अर्जुनस्य तृतीयपाण्डवस्य सारथ्यादकिं कृत्वा तस्य वभिूतेस्संवर्धनमाततानेति सः संवर्धतिार्जुनवभिूतिःिस च नीलेन अम्बरेण चकासता ज्येष्ठेन भ्रात्रा बलरामेण घटति आस इति नीलाम्बरेण घटतिः। भुवि विश्रुतश्च।नजि शोभने अङ्गे मेघस्य वभिवं संलीनं चक्रे सः ।मेघश्यामळत्वात्।ततश्च सः संलीनमेघवभिवो नजिशोभनाङ्गे।

अयमपि सहिाचलः नजिोपरि अर्जुनाख्यानां तरुवशिषाणां वभिूति संवर्धनमातनोतीति अयं संवर्धतिार्जुनवभिूतिः।अस्य तावच्छखिराणि नीलमंबरं आकाशं स्पृशन्तीति नीलाम्बरेण घटतिोऽयमचलः।अपि च वष्णिुक्षेत्रेषु अन्यतमत्वात् भुवि विश्रुतश्च।
अथैनं गरिविरं कल्किसाम्यवन्तं कथयति श्लेषालङ्कृतजिुष्टेन पद्येन।
काले कराकलतिसत्करवालकृत्त-
वक्रातभिीषणमहीरुहमानुषेड्यः।
स्वामस्तिवायमचलो नरसहि! सत्यं
कल्कीति यामि शिरणं कलकिालभीतः।।[53]

स तु भगवान् कल्की स्वसङ्कल्पति उचति काले करेण आकलति सन्तं पटुं करवाळं दधानस्तेन करवाळेन वक्रान् अतभिीषणान् अहङ्कारतस्स्तब्धान् अत एव महीरुहान् वृक्षान् इव स्थतिान् मानुषान् कर्तष्यितीति तत एव ईडष्यिते -ईड्यो भवष्यिति च इति पौराणकिाः। ततश्च सः काले कराकलतिसत्करवालकृत्त-वक्रात-भीषण-मानुषेड्यः।

अयमचलोऽपि काननं निबिडिमस्ति इति पश्यद्भिः पर्वत-परसिर-परष्किार-परायणैः उचति काले करेण आकलतिन करवालेन वक्रान् अतीव भीषणान् महीरुहान् वृक्षान् कृत्तवद्भरि्मानुषैः युक्तश्च तत एव भक्तजनाभगिम्यश्च ईड्यश्च इति काले कराकलतिसत्करवालकृत्त-वक्रात-भीषण-महीरुहमानुषश्च ईड्यश्च इति काले कराकलतिसत्करवालकृत्त-वक्रात-भीषण-महीरुहमानुषेड्यः।अतः असावेव कल्कीति अमुं कल्कनिं वनि कमन्यं कलकिालाद्भीतश्शरणं यायादिति तिं शरणं यामीति विक्ति कविः।

एवं कवीश्वराणां एतेषां दशावतारश्रीसहिाचलयोः श्लेषोक्तिः।

6.दशावतारानुभवे श्रीनधिस्विामनिां श्रीमद्वेङ्कटाध्वरणिाञ्च रीतवशिषिः।
श्रीमद्वेङ्कटाध्वरी श्लेषयमकचक्रवर्तीति प्रसद्धिः।नानाग्रन्थकृतस्तस्य लक्ष्मीसहस्रं अतमिनोहरं स्तोत्रम्।तस्य एकवशिस्तबकः दशावतारस्तबक इति नामवान् ३६ श्लोकात्मकः ।तत्र

मात्स्यज्योतषिि मिन्दरक्षणपरेऽनन्तोच्चहर्षावहे
हर्यास्यस्पृशि चारुवर्णनि किृताशेषाधकिोपक्रयि।
एणश्रीमुषि कामपालवभिवे कृष्णे कलध्विंसने
देवि! त्वद्दयतिावतारदशकं ध्यायाम्यपाङ्गे तव।।[54]
कृष्णः केशो दृगेषा झषतनुरधरोऽमन्दरागं वधित्ते
सौकर्यं दोष्णयुरोजे कलि मुखहरति मध्यमात्ता वलश्रिीः।
रामाग्र्यत्वं नतिम्बः प्रथयति यमुनादर्पहृद्रोमवल्ली
धत्ते जङ्घाभरािमश्रयिमिहि कलहित् पादपद्मं तव श्रीः!।।[55]

इति श्लोकौ अवधेयौ। तत्र प्रथमेन श्लोकेन श्लेषालङ्कारशरणैस्तैः लक्ष्मीदेव्या अपाङ्गे दशावताराः, द्वतिीये लक्ष्मीदेव्या अङ्गेषु च दशावतारसान्निध्यं वर्णतिम्।महान् चमत्कारः प्रदर्शतिश्च।एतयोः श्लोकयोः ववरिणं तत्रत्यव्याख्याने द्रष्टव्यम्।।

एवमेव इमे अपि कववरिा ववहिवरदस्तवे एकस्मन्निेव श्लोके श्लेषभूषति स्वकुलकूटस्थस्य श्रीवात्स्यवरदगुरोर्वरदराजस्य भगवतश्च वर्णनमाकलतिवन्तः।स च श्लोक इत्थम्

वेदोद्धारण! मन्दरागभरण! श्लाघ्यक्षमाधारण!
प्रह्लादस्थतिमानसात्मवभिवश्रीगोपनैकव्रत!।
श्रीमच्छ्रीभृगुवंशजात! वरद ! श्रीलक्ष्मणातप्रियि!
श्रीमद्यामुनकर्षणाप्तमधुर! स्वामनि! कलेः पाहि नः।।[56]

एतस्य श्लोकस्य ववरिणं मया प्रकाशति श्रीनधिग्रिन्थमालायाः तुरीये कुसुमे पुस्तके टप्पि्ण्यां [57] इत्थं दत्तम्।

“स्वकुलकूटस्थस्य वत्सगुरोः वत्सं वरदं दशावतारकीर्तनेन स्तौति।श्रीवत्सवरदगुरोः (११६५ A.D.-१२७५A.D) वरदस्य अवतारदशकस्य च श्लेषोक्तिः वर्णनमत्र।

वेदोद्धारण!- मत्स्यः-वरदगुरुरपि स्वोक्तभिर्विेदोद्धारणं कृतवान्।
मन्दरागभरण!-कूर्मः-मन्दर +अगभरण। पक्षे मन्देषु रागः।
श्लाघ्यक्षमाधारण!- वराहः क्षमा भूमिः।पक्षे गुणवशिषः।

प्रह्लादस्थतिमानस!-नृसहिः।प्रह्लादे दैत्यसुते स्थतिं मानसं यस्य सः।पक्षे प्रह्लादे सन्तोषे।

आत्ममहमिश्रीगोपनैकव्रत!-वामनः।“ कृष्णाजनिेन संवृण्वन् वधूं वक्षस्थलालयाम्” इति पूर्वे।पक्षे-अनाविष्कृतात्ममहमिा।

श्रीमच्छ्रीभृगुवंशजात!-परशुपरकिर्मा रामः।भृगुवंशजातौ उभौ।

श्रीलक्ष्मणातप्रियि!- दाशरथी रामः- लक्ष्मणस्य अतप्रियिः।पक्षे श्रीरामानुजस्य यतपितेः अतप्रियिः प्रयिभागनियपौत्रत्वात्। श्रुतप्रकाशकिाप्रसूतत्विाच्च।

श्रीमद्यामुनकर्षण!-बलभद्ररामः –आकृष्टवानसौ यमुनामतीतिहासवदिः।पक्षे श्रीयामुनाचार्यं स्वगुणैः कर्षतिवानतिा

आप्तमधुर!-कृष्णः-“ह्यागतो मधुरां पुरीं”इतति पौराणकिाः।आप्तेषु मधुर इतति पक्षे।

कलेःपाहि-किल्की-कलेरस्मान् पातिइतति पुराणज्ञाः।पक्षे च प्रार्थना एवम्।

वरद!-उभयत्र “वरद” इतिनामधेयम्।

एवमेतेषां कवीश्वराणां दशावतारानुभवभूमा जृम्भत इतशिम्।।

REFERENCE

[1] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –तृतीये प्रश्ने –त्रयोदशोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूर पुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-249- पङ्क्तिः 19 | [2] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –तृतीये प्रश्ने –त्रयोदशोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-249-पङ्क्ती 19 & 20 | [3] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –तृतीये प्रश्ने –त्रयोदशोऽनुवाकः –श्रीभट्टभास्करभाष्यं- प्रकाशकः | [4] कृष्णयजुर्वेदीयं तैत्तरीयारण्यकं श्रीमत्सायणाचार्यवरिचितिभाष्यसमेतं –प्रकाशकः आनन्दाश्रममुद्रणालयः ख्रस्तिब्दा1897-पुटम् 201 | [5] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –षष्ठे प्रश्ने –प्रथमोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्, मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-264- पङ्क्तिः 13 | [6] कृष्णयजुर्वेदीय- तैत्तरीयसंहिता –चतुर्थे काण्डे –प्रथमे प्रश्ने –अष्टमोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय संहिता - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-133- पङ्क्तिः 9 | [7] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –तृतीये प्रश्ने –त्रयोदशोऽनुवाकः- (कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-249- पङ्क्तिः 19 | [8] श्रीकूरनारायणीयं-उत्तरनारायणभाष्यं- तैत्तरीय-ऐतरेय-छान्दोग्योपनषिद्भाष्यम्-श्रीरङ्गरामानुजमुनविरिचितिं-प्रकाशकिा-उभयवेददान्तग्रन्थमाला 25,नाथमुनविीथी -1973 –पुटम्215 | [9] श्रीभगवद्गीतायां-चतुर्थाध्याये-श्लोकौ 7& 8 | [10] श्रीविष्णिुपुराणे षष्ठेऽशे 84तमः श्लोकः प्रकाशकम्- ग्रन्थमालाकार्यालयः काञ्चीपुरम्-3 1972 पुटम् 415 | [11] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –तृतीये प्रश्ने –द्वादशोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-249-, पङ्क्तिः16 | [12] स्तोत्रमाला-स्तोत्ररत्ने –श्लोकः 20 ग्रन्थमालाकार्यालयः काञ्चीपुरम्-3 1958 पुटं 5 | [13] कृष्णयजुर्वेदीयं तैत्तरीयब्राह्मणं श्रीमत्सायणाचार्यवरिचितिभाष्यसमेतं –प्रकाशकः आनन्दाश्रममुद्रणालयः ख्रस्तिब्दाः1897-पुटम् 988 पङ्क्तिः 14 | [14] कृष्णयजुर्वेदीयं तैत्तरीयब्राह्मणं श्रीमत्सायणाचार्यवरिचितिभाष्यसमेतं –प्रकाशकः आनन्दाश्रममुद्रणालयः ख्रस्तिब्दा1897-पुटम् 990पङ्क्तिः 19 | [15] कृष्णयजुर्वेदीयं तैत्तरीयब्राह्मणं श्रीमत्सायणाचार्यवरिचितिभाष्यसमेतं –प्रकाशकः आनन्दाश्रममुद्रणालयः ख्रस्तिब्दा1897-पुटम् 990पङ्क्तिः 20,21 & 22 | [16] कृष्णयजुर्वेदीयं तैत्तरीयब्राह्मणं श्रीभट्टभास्कराचार्यवरिचितिभाष्यसमेतं – | [17] कृष्णयजुर्वेदीयं तैत्तरीयब्राह्मणं श्रीमत्सायणाचार्यवरिचितिभाष्यसमेतं –प्रकाशकः आनन्दाश्रममुद्रणालयः ख्रस्तिब्दा1897-पुटम् 990 पङ्क्तिः 23 | [18] द्रावडिाम्नायदव्यिकप्रबन्धटीका – प्रबन्धा प्रकाशकः च जगदाचार्य प्र.भ.अण्णङ्गराचार्यः काञ्चीपुरं 1962 पुटम् 101 | [19] कृष्णयजुर्वेदीय- तैत्तरीयब्राह्मणे –तृतीये अष्टके षष्ठे प्रश्ने –प्रथमोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-157- पङ्क्तिः 5 | [20] द्रावडिाम्नायदव्यिकप्रबन्धटीका – प्रबन्धा प्रकाशकः च जगदाचार्य प्.भ.अण्णङ्गराचार्यः काञ्चीपुरं 1962 पुटम् 102 | [21] श्रीभगवद्गीतायां चतुर्थोऽध्यायः श्लोकः 5 | [22] यतीन्द्रमतदीपकि चन्निामु र.श्रीनविासपाट्टराचार्याः कुम्भघोणम् 1937 पुटं 352 | [23] कृष्णयजुर्वेदीय- तैत्तरीयसंहिता –प्रथमे काण्डे –द्वतीिये प्रश्ने –त्रयोदशोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय संहिता - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 पुटं 8 | [24] कृष्णयजुर्वेदीय- तैत्तरीयारण्यके –षष्ठे प्रश्ने –प्रथमोऽनुवाकः- कृष्णयजुर्वेदीय- तैत्तरीय ब्राह्मणम् - प्रकाशकः श्रीनृसहिप्रयािट्रस्ट्,मयूरपुरी, चेन्नै-600 0004 – शकाब्दः1925 (2003A.D) पुटम्-265- पङ्क्तिः 14 | [25] श्रीमद्वाल्मीकिरामायणे युद्धकाण्डे एकवशित्युत्तरशततमस्सर्गः श्लोकः14, बालकाण्डे सर्गः त्रशिः पञ्चसप्ततितिमश्च | [26] महाभारते शान्तपिर्वणिमोक्षधर्मपर्वणि348 तम अध्याये श्लोकः 2 टी. आर् कृष्णाचार्यसंशोधनं शक 1829 पुटं 568 | [27] नैषधीयचरति श्रीहर्षरचति एकवशि सर्गे 56 तम श्लोकतः 93तमश्लोकपर्यन्तं प्रकाशकः-तुकाराम जावजी शक1816 पुटं 937 तः 954 पर्यन्तम् | [28] दशावतारचरतिकाव्यं क्षेमेन्द्ररचतिम् | [29] श्रीविष्णिुपादादकिेशान्तस्तोत्रं- श्रीशङ्करभगवत्पादवरिचितिं-श्लोकः-49 | [30] स्तोत्रमाला-ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1958 अतमिानुषस्तवः पुटम् 21तः 26 पर्यन्तम्। | [31] स्तोत्रमाला-ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1958 सुन्दरबाहुस्तवः पुटम् 26 तः 34 पर्यन्तम्। | [32] स्तोत्रमाला-ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1958 श्रीरङ्गराजस्तवे उत्तरशतकं पुटम् 49तः 55 पर्यन्तम्। | [33] स्तोत्रमाला-ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1958 श्रीवात्स्यवरदगुरुभरिनुगृहीतं परत्वादपिञ्चकं तृतीयः श्लोकः पुटं 62। | [34] वेदान्तदेशकिग्रन्थमाला-स्तोत्रावलीवभिागः- ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1940-दशावतारस्तोत्रम्- श्लोकः 12 पुटं 3 | [35] वेदान्तदेशकिग्रन्थमाला-स्तोत्रावलीवभिागः- ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1940 दयाशतकम्- श्लोकाः 81तः-90 पर्यन्तं पुटें14 &15 तथा श्रीवरदराजपञ्चाशत् श्लोकाः 22-25 पुटे 17 तथा 18 | [36] वेदान्तदेशकिग्रन्थमाला-काव्यनाटकवभिागः-सङ्कल्पसूर्योदयनाटकम्- ग्रन्थमालाकार्यालयः 39.सन्नधिविवीथी काञ्चीपुरम्-3 -1940 सप्तमोऽङ्कः पुटं 76-83 | [37] गीतगोवन्दिं –जयदेववरिचितिं-मङ्गलप्रकरणं | [38] छन्दोऽनुशासनं-प्रकाशकः सघिीजैनशास्त्रवद्यापीठःभापतीयवद्यिाभवनं,बम्बई 1961-पुटं 291. | [39] छन्दोऽनुशासनं-प्रकाशकः सघिीजैनशास्त्रवद्यापीठःभापतीयवद्यिाभवनं,बम्बई 1961-पुटं 291. | [40] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013-पुटं 76 | [41] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013-सहिाचलपञ्चाशत् श्लोकः 37 पुटं 184 | [42] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 38 पुटं 184 | [43] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 39 पुटं 185 | [44] श्रीवराहपुराणस्थतया श्रीवशिष्टिाद्वैताचार्यैः श्रीवेदान्तदेशकिादभिः रहस्यग्रन्थेषूदाहृतौ इमौ श्लोकौ- चल्लिरै रहस्यङ्गळ्- द्वतीियो भागः-प्रकाशकः वी.आर्.रामरामस्वामि ऐयङ्गार् तेर्कुवीथी तञ्जावूर् 1980 रहस्यशखिामणिः पुटं 234 & 246 | [45] श्रीमद्भागवतमहापुराणं –गीताप्रेस् गोरखपुर 273005-शक 2061 –पुटं 34 | [46] श्रीमन्नारायणीयं-रामायण पब्लषिङ्गि् हौस्-श्रीराममन्दरि्-बाङ्क्रोड्-आलत्तूर्-पुटं 58 | [47] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 40 पुटं 185 | [48] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 41 पुटं 185 | [49] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 42 पुटं 185 | [50] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 43 पुटं 185 | [51] श्री श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 44पुटं 185 | [52] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 45 पुटं 185 | [53] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- सहिाचलपञ्चाशत् श्लोकः 46 पुटं 186 | [54] श्रीलक्ष्मीसहस्रं-श्रीकृष्णसभा,मुम्बई -2007-दशावतारस्तबकः- श्लोकः34 पुटं 418 | [55] श्रीलक्ष्मीसहस्रं-श्रीकृष्णसभा,मुम्बई -2007-दशावतारस्तबकः- श्लोकः35 पुटं 420 | [56] श्रीनधिग्रिन्थमाला-राष्ट्रयिसंस्कृतवद्यापीठं-तरुिपतिः-आन्ध्रप्रदेशः-2013- ववािहवरदस्तवः श्लोकः 32 पुटं 145 | [57] श्रीनधिग्रिन्थमाला-चतुर्थं कुसुमं-प्रकाशकः व.िएस्. करुणाकरः –हैदराबाद् 500028 -1976- पुटं17 |